International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(4): 110-111
© 2025 IJMH
www.themultijournal.com
Received: 18-08-2025
Accepted: 25-08-2025
Publish : 26-08-2025

**डॉ. सुमनदासः**
अद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः,नवदेहली-110016

**Correspondence:**
**डॉ. सुमनदासः**
अद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः,नवदेहली-110016

# अद्वैतवेदान्ते विवर्तवादः

**डॉ. सुमनदासः**

**जीवेश्वरयोः औपाधिकः भेदः न तु पारमार्थिकः इति अद्वैतिनां सिद्धान्तः।**

कार्य-कारणमतवादानुसारेण कार्यं कारणस्य प्रतिभासः विवर्तमात्रं वा, तदेव विवर्तवादः इति कथ्यते। अर्थात् एतन्मतानुसारं केवलं कारणं कार्यरूपे प्रतिभातं भवति, परन्तु कार्ये न परिणमते । अद्वैतवैदान्तिगणः विर्वतवादी। ते द्विधा भवितुम् अर्हन्ति परिणाम विवर्तभेदेन च। तत्र सतत्त्वतोऽन्यया प्रथा परिणामः। वस्तुनः यथार्थतः स्वरूपं परित्यज्य वस्त्वन्तरप्राप्तिः परिणामः। वस्तुनः स्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः विवर्तः - **अतत्त्वतोऽन्यथा प्रथा विवर्तः।**[1] यदा किंचन कारणभूतं वस्तु अवास्तविकतया कार्यरूपवस्त्वन्तरत्वं प्राप्नोति तदा प्राथमिकवस्तुनः द्वितीयवस्तुरूपेण विवर्तः इत्युच्यते। यथा रज्जुः स्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते एवं शुक्तेः मिथ्या रजतरूपेण भानं विवर्तः। विवर्ते कार्यकारणयोः विषमा सत्ता भवति। यदुक्तं धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाम् - **'विवर्तो नामोपादानविषमसत्ताककार्यापत्तिः'** इति। तथा च स्वोपादानसत्ताविषमसत्ताकत्वे सति कार्यत्वं विवर्तत्वं इति लक्षणं पर्यवस्यति।

परिणामवादः अद्वैतसम्मतो नास्ति। यतः यदि जगत् ब्रह्मणः परिणाम इत्यंगीक्रियते तर्हि जगतः उपादानकारणत्वेन ब्रह्मैव अंगीकर्तव्यम्। तथा सति ब्रह्मण्यपि विकारः जायेत तथा ब्रह्मणः अविकार्यस्वरूपस्य व्याख्या कर्तुं न शक्यते। अतः तन्न युक्तम्। यतः 'पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते' इति भाष्यवाक्यानुसारं ब्रह्म विना अन्यानि तत्त्वानि जगत् कारणत्वेन अंगीकर्तुं न शक्यन्ते।

विवर्तवादानुसारं ब्रह्म जगतः विवर्तः एव रज्जुसर्पदृष्टान्ते रज्जुः येन प्रकारेण सर्परूपे विवर्ते प्रतीयते, तथा ब्रह्म जगतः विवर्तोपादानकारणरूपेण तिष्ठति। एवं पारमार्थिकसत्यरूपं ब्रह्म व्यावहारिकजगद्रूपेण भासते इति इदं जगत् ब्रह्मणः विवर्तरूपम्।

ननु चिन्मात्रं ब्रह्म जडरूपेण परिणामं लभते इति चेत् न। ब्रह्मणि परमार्थतः परिणामो नास्ति। वस्तुतः अपरिणामी एव परिणामत्वेन भासते। अत एव च। **"सर्वं खल्विदं ब्रह्म", सदेव सौम्येदमग्रे आसीत्"**[2] इत्यादयः श्रुतयः अद्वैतवादं स्थापयन्ति। एवमेव वेदेऽपि **"इन्द्रो मायाभिः पुरुरूप ईयते"**[3] "रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय" इत्यादयः ऋचः स्फुटतयैव भेदज्ञानस्य मायानिबन्धनत्वं प्रतिपादयन्ति। एवं श्रुत्यन्तरे भेददर्शननिन्दा च स्पष्टा भवति - "मृत्योस्य मृत्युमाप्नोति" , य इह नानेव पश्यति' इति। ततश्च अद्वितीयं ब्रह्मैव पारमार्थिकम् भेदज्ञानं च अविद्योपाधिकमेव इति निश्चेतव्यम्।

ब्रह्मणि न कोऽपि धर्मः अस्ति। निधर्मकत्वात्, नित्यशुद्धबुद्धमुक्तस्वभावत्वात् कूटस्थत्वाच्च। शंकराचार्यः बृहदारण्यकोपनिषद्भाष्ये आह - **"न च निरवयवं विक्रियमाणं दृष्टं क्वचित्, अन्यत्र च"** नच निरवयवस्य अनेकधर्मवत्वे दृष्टान्तोऽस्ति" इति च। संक्षेपशारीरके सर्वज्ञात्ममुनिना अपि अयमेव सिद्धान्तः प्रतिपादितः। तद्यथा –

**"विवर्तवादस्य हि पूर्वभूमिः वेदान्तवादे परिणामवादः। व्यवस्थितेऽस्मिन् परिणावादे स्वयं समायाति विवर्तवादः।"**[4]

अमुमेव सिद्धान्तं पुरस्कृत्य वाचस्पतिः एवमाह-यद्यपि श्रुतिशतादैकान्तिकाद्वैतप्रतिपादनपरात् परिणामो वस्तुतो निषिद्धः, तथापि क्षीरादिदेवतादृष्टान्तेन पुनःस्तवास्तवप्रसंगपूर्वपक्षे आपाद्य सर्वधायं पक्षो न घटयितुं शक्यत इत्यपबाध्य " श्रुतेस्तु शब्दमूलत्वात्" "आत्मनि चैवं विचित्राश्च हि" इति सूत्राभ्यां विवर्तदृढीकरणेनैकान्तिकाद्वयलक्षणः श्रुत्यर्थः परिशोध्यत इत्यर्थः। तस्मादस्त्यविकृतं ब्रह्म तत्त्वतः।[5]

**सन्दर्भ**


1. वेदान्तसारः (पृ.-151)
2. छान्दम्योपनिषद् (-3-19-1)
3. छान्दग्योपनिषद् (6-2-1)
4. ब्र. सू.2-1-27 (शा.भा.)
5. भामती पृ.475-76


**सन्दर्भग्रन्थसुची:**


1. वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्र, शरच्चन्द्र घोषाल, संस्कृत पुस्तक भण्डार, 2004
2. भामती (शारीरकभाष्यव्याख्या), वाचस्पतिमिश्रः, स.-अनन्तकृष्णशास्त्री, निर्णयसागर प्रेस, बम्बई, 1938
3. ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीशङ्कराचार्यः, श्रीकृष्णसेमवालः, दिल्ली संस्कृत अकादमी।
4. वेदान्तसारः, सदानन्दयोगीन्द्राचार्यः, सुबोधनीटीकाप्रणेता श्रीनृसिंहसरस्वती, स. आचार्यज्योतिः सेनगुप्ता, संस्कृतबुकडिपो, कोलकाता, 2015
5. अद्वैतसिद्धिः, बालबोधिनीव्याख्यासहिता, योगेन्द्रनाथदेवेन्द्रशर्मा , तारापबलिकेशन्स चैत्रे , 2006
6. अद्वैतदीपिका , नृसिंहाश्रमस्वामिनः , सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः , वाराणसी, 1984
7. आगमप्रमाणम् यमुनाचार्यः ओरियन्टल इन्स्टिटयुट् बडौदा , 1976
8. ईशादिदशोपनिषदः मोतीलालबनारसीदासः, प्रथमसंस्करणम् , देहली 2002
9. उपनिषत्संग्रहः पं.जगदीशशास्त्री , मोतीलालबनारसीदासः, पुनमुद्रितसंस्करणम् नवदेहली , 1998
10. छान्दोग्योपनिषदः , शाङ्करभाष्यम् , मोतीलालबनारसीदासः , वाराणसी , 1978
11. ब्रह्मसूत्रशाङ्करभाष्यम् (सत्यानन्दीटीका) सत्यानन्दसरस्वती गोविन्दमठ वाराणसी, 1992
12. ब्रह्मसूत्रशाङ्करभाष्यम् (भामती) वाचस्पतिमिश्रः चौखम्बा विद्याभवन , 2014
13. ब्रह्मसूत्रशाङ्करभाष्यम् , श्रीशङ्करग्रन्थावली , मोतीलालबनारसीदास : 2015
14. ब्रह्मसिद्धिः आचार्यमण्डनमिश्रा सम्पादकः प्रो .केदारनाथ त्रिपाठी, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् , नवदेहली . 1999
15. ब्रह्मविद्याभरणम् श्रीमद्वैतानन्दस्वामिनः , संस्कृत एजुकेशन सोसइटी, मद्रास, 1976
16. बृहदारण्यकोपनिषद् ,गीताप्रेस गोरखपुरम् पुनर्मुद्रितसंस्करणम्
17. वेदान्तपरिभाषा, डॉ.श्रीगजाननशास्त्रीमुसलगांवकरः, सम्पादकः श्रीराशास्त्रीमुसलगांवकर, चौखम्बा विद्याभवन , वाराणसी , 1983


**अन्तजाशिसंकेत**


1. www.archive.org_
2. www.epathshala.nic.in
3. www.epustakalay.com
4. http://www.bing.com
5. www.sankrachary.nic
6. www.sankrachary.nic